This Question Paper consists 35 questions and 7 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः सन्ति। 7 मुद्रितपुटानि च सन्ति ।

**Sl. No.**

**Roll No.**
**अनुक्रमांङ्क** | | | | | | | | | | | |

**Code No.** **60/SS/A**
**गुढसंख्या**

**Set /स्तबकः A**

# SANSKRIT VYAKARAN
# संस्कृतव्याकरणम्
# (346)

**Day and Date of Examination**
**(परीक्षादिनं: दिनाङ्कश्च)** ______________________

**Signature of Invigilators**
**(निरीक्षकयोः हस्ताक्षरम्)**
1. ______________________
2. ______________________

**सामान्य निर्देशा :**

1. अनुक्रमाङ्क : प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
3. वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गुढसंख्या 60/SS/A-A नूंन लेख्या।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

# SANSKRIT VYAKARAN

# संस्कृतव्याकरणम्

# (346)

**परीक्षासमयावधिः** (Time) होरात्रयम् (3 Hrs.)] [पूर्णाङ्का : (Full Marks) **100**

---

**निर्देशाः** (i) अस्मिन् प्रश्नपत्रे **[A]** भागे **10, [B]** भागे **10, [C]** भागे **10, [D]** भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (प्रश्नाः × अङ्काः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

(iii) सर्वे प्रश्नाः अनिवार्याः ।

---

[A] दशानां युक्तं विकल्पं चिनुत । **[10 × 1 = 10]**

**1.** न पूजनात् इत्यत्र किम् न।

(क) समासः

(ख) पूर्वनिपातः

(ग) समासान्तः

(घ) परनिपातः

**2.** न पन्थाः इति विग्रहस्य समासः क्रियते चेत् किम् रूपं साधु।

(क) अपथः

(ख) अपथा

(ग) अपन्थाः

(घ) अपन्थः

3. चिक्षय इत्यत्र कः प्रत्ययः।

(क) णल्

(ख) थल्

(ग) अ

(घ) म

4. अगमत् इत्यत्र च्लेः स्थाने किम् भवति।

(क) अङ्

(ख) चङ्

(ग) सिच्

(घ) सक्

5. परह्यः फलम् पक्वम्। तदा मया दृष्टम्। इत्यत्र पच्–धातोः को लकारः प्रयोक्तुम् शक्यः।

(क) लङ्

(ख) लिङ्

(ग) लिट्

(घ) लोट्

6. चैत्रः मैत्रम् चन्द्रम् दर्शयति इत्यत्र प्रयोजककर्ता कः।

(क) चैत्रः

(ख) मैत्रः

(ग) चैत्रः मैत्रश्च

(घ) अनयोरेकोऽपि न

7. सार्वभौमः इत्यत्र उभयपदवृद्धिविधायकं सूत्रम् किम्।

(क) अचो ञ्णिति

(ख) तद्धितेष्वचामादेः

(ग) अनुशतिकादीनाञ्च

(घ) किति च

8. क्व इत्यस्य विग्रहः कः।

(क) किम्

(ख) कस्मिन्

(ग) कस्मात्

(घ) कस्मै

9. अद्यतनभूते कः लकारः भवति।

(क) लुङ्

(ख) लङ्

(ग) लुट्

(घ) लिट्

10. पठ्–धातोः णिच् प्रत्ययः विधीयते क्रियाफलं च कर्ता प्राप्नोति तर्हि धातोः किम् विधीयते।

(क) परस्मैपदम्

(ख) आत्मनेपदम्

(ग) उभयम्

(घ) सुप्

[B] दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत। [10 × 2 = 20]

11. का वृत्तिः। तद्भेदाश्च के। [1 + 1]

12. रुध्–धातोः परस्मैपदं भवति आत्मनेपदम् वा। रुध्–धातुः कस्मिन् गणे अन्तर्भवति। [1 + 1]

13. क्रमम् अधीते वेद वा इत्यत्र तद्धितप्रत्यये किम् रूपम्। सूत्रं च किम्। [1 + 1]

14. महादेवः इत्यत्र सामानाधिकरण्यम् अस्ति न वा। कश्च अत्र समासः। [1 + 1]

15. गङ्गानदी इत्यत्र सामानाधिकरण्यम् अस्ति न वा। कश्च अत्र समासः। [1 + 1]

16. वृक्षश्रितः इत्यत्र समासनाम किम्। कस्य पदस्यार्थः अत्र प्रधानः। [1 + 1]

17. कुर्वः इत्यत्र प्रत्ययस्य उकारस्य लोपः केन सूत्रेण कश्च तत्सूत्रार्थः। [1 + 1]

18. पूजयते इत्यत्र आत्मनेपदविधायकं सूत्रम् किम्। कश्च तत्सूर्थः। [1 + 1]

19. उडूपाः देशे सन्ति किञ्च देशस्य नाम अपि उडूपशब्दात् लभ्यते तर्हि देशस्य नाम किम्। केन सूत्रेण च प्रत्ययः। [1 + 1]

20. युष्माकम् अयम् ग्रन्थः इत्यत्र युष्माकम् अयम् इति स्थले किं तद्धितान्तम् रूपम् प्रयोक्तुम् शक्यते। तदा वाक्यं च किम् स्यात्। [1 + 1]

[C] दश अनतिदीर्घोत्तरैः समाधत्त। [10 × 4 = 40]

21. विशेषणं विशेष्येण बहुलम् इति उपमानानि सामान्यवचनैः इति अनयोरेकं सूत्रं व्याख्यात।

22. कुगतिप्रादयः इति तत्रोपपदं सप्तमीस्थम् इति अनयोरेकस्य सूत्रस्य व्याख्यां कुरुत।

23. अनुपराभ्यां कृञः इति सूत्रं व्याख्यात।

24. गायिका तन्वी इत्यनयोः एकम् रूपं ससूत्रं साधयत।

25. होता होतासि इत्यनयोरेकं रूपं ससूत्रं साधयत।

26. भवितास्मि चेतितास्मः इत्यनयोरेकं रूपं ससूत्रं साधयत।

27. अनुभूयते इति रूपं ससूत्रं साधयत।

28. चटका हर्त्री इत्यनयोः एकम् रूपं ससूत्रं साधयत।

29. गुणिनी जपन्ती इत्यनयोः एकम् रूपं ससूत्रं साधयत।

30. क्रीणन्ति पूजयामि इत्यनयोरेकं रूपं ससूत्रं साधयत।

[D] पञ्च दीर्घोत्तरैः समाधेयाः। [5 × 6 = 30]

31. शाययति वाजयति इति अनयोरेकं रूपं ससूत्रं साधयत।

32. विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति सूत्रं संक्षेपेण व्याख्यात।

33. जुहोषि जुहोमि इत्यनयोरेकं रूपं ससूत्रं साधयत।

34. तितांसति अथवा पिपठिषति इति रूपं ससूत्रं साधयत।

35. अगदम् अपठन् इत्यनयोरेकं रूपं ससूत्रं साधयत।

⌘⌘⌘